यतः कान्ता जाता इत्यनेन मनोहरतुरङ्गमाः तस्याः सकाशात्सम्भूताः । तथा चोक्तम्—

पुरा कृतयुगस्यादौ यजतः परमेष्ठिनः ।
दृशोस्तु धूमावृतयोरापतन्नस्रबिन्दवः ॥
तान्पाणिपल्लवे लक्ष्मीर्दधाराशु हयास्तदा ।
जातास्ततस्ते तुरगाः सर्वलक्षणलक्षिताः ॥

* * * *

वेधाप्यधात्सद्गुणिनो हि वाहिनिबन्धबुद्ध्यामरदानवानाम् ।
सर्वार्थदांस्तानधिकृत्य भानुप्रस्थानदुस्थः किमभूदनन्ते ॥
असमसमरवैजश्रीविलासैकवासः
कृतदितिसुतस(ङ्गः) प्राप्य दिव्याश्वरत्नम् ।
निबिडयति बिडौजाः केवलं त्यक्तचित्तः
रहसि च सह शच्या शश्वदालिङ्गनानि ॥
ये वास्तोष्पतिसम्पदं मखमुखे गत्वा सु(खं) भूभुजा-
माजौ सद्विजयं परश्रियमवस्कन्धेव मन्ये मुदम् ।
सत्कीर्तिं वितरन्ति कार्तिकसुधाज्योतिर्द्युतिद्योतिनीं
दिव्यत्वं तुरगा यदिष्टमिह तां किं किं (हि) तैः प्राप्यते ॥

स्मृत्वा विभो रूपगतं हयानां तत्प्रेरिताज्वलनशास्त्रमुखं विशन्ति ।
पूर्वोक्ततन्वा(न्त्र)कलनाकलितं हि तेषामाचक्ष्महे जननलक्षणमल्पमादौ ॥

कालभेदेन वाहानां चत्वारः सम्भवा मताः ।
द्विविधं सम्भवं केचित्सप्त चाष्ट तथापरे ॥
अग्निबाष्पाण्डपीयूषात्रिदशाशनिसामतः ।
गर्भादष्टविधोत्पत्तिरश्वानां परिकीर्तिता ॥

* * * *

बह्वन्नभक्षी क्षणदाप्रद्वेषी क्षुद्रो हरिच्छिद्रविघातकारी ।
पिशाचसत्त्वस्तुरगो हि शूद्रवासप्रियः क्रूरकुरूपभीरुः ॥

Colophon:

इति हयायुर्वेदलक्षणस्थाने सत्त्वाध्यायः ॥

* * * *

मतान्तरे अर्धमात्राप्रमाणम्—

योजनानि दशायाति दिनैकेन हयोत्तमः ।

मध्यमाष्टौ समायाति षट्सु याति न दुःखितः ॥

Colophon :

इत्यश्वायुर्वेदे शालिहोत्रे लक्षणस्थाने गतिभारयोजनप्रमाणलक्षणाध्यायः ॥

See under No. 13323 sequent for the end.

No. **13322.** अश्वायुर्वेदः.

ASVĀYURVĒDAḤ.

Substance, paper. Size, $11\frac{1}{4} \times 8\frac{3}{4}$ inches. Pages, 344. Lines, 18 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

This is the second of the three volumes referred to under the previous number, wherein see for contents.

Same work as the above.

No. **13323.** अश्वायुर्वेदः.

ASVĀYURVEDAḤ.

Substance, paper. Size, $12\frac{1}{8} \times 9\frac{7}{8}$ inches. Pages, 156. Lines, 18 on a page. Character, Dēvanāgarī. Condition, good. Appearance, old.

This is the third of the three volumes referred to under No. 13321 ante, wherein see for contents.

Same work as the above.

See under No. 13321 for the beginning.

End:

यस्य नासास्यतोऽङ्गल्यौ योषिण्या चापि दूरगम् ।

प्रणष्टं यश्च कालेषु तच्छल्यं व्यञ्जने हितम् ॥

तत्पाचयित्वा कालेन मार्गोपत्नं विनिर्दिशेत् ।

व्रणंशल्य(स्य)मीमांसा यथावत्परिकीर्तिता ॥

Colophon :

इत्यश्वायुर्वेदे शालिहोत्रीये शारीरे तृतीयस्थाने व्रणाष्टशल्यहरणं नामाष्टदशोऽध्यायः समाप्तः ॥

सङ्ग्रामजातशल्यविघातक्षतशमनविधिरुच्यते—

सुश्रुत उवाच—

सर्ववेदान्तविदुषं तपस्वी वाग्विदां वरम् ।

शालिहोत्रमृषिश्रेष्ठं गान्धारराष्टनैषधाः ॥

* * * *

वयमश्वहितार्थाय भवन्तं शरणं गताः ।
ततोऽब्रवीच्छालिहोत्रः सुश्रुताय महामुनिः ॥

* * * *

अश्वानां नेत्राञ्जनानि—

तिनसीपिप्पलीचारुमरीचीबारहरीतकीबीजसुबीजम् ।
आमलकारसघट्टनघट्टनयोजदृष्टिसीनसमानम् ॥
महादोषप्रदावर्तानामग्निचिकित्साविधिरुच्यते ।

No. **13324.** मातङ्गलीला.

MĀTAṄGALĪLĀ.

Pages, 67. Lines, 10 on a page.

Begins on fol. 43*a* of the MS. described under No. 13031.

Breaks off in the 11th Adhikāra.

An elementary treatise in 12 chapters as detailed below, dealing with the origin and characteristics of elephants, the duration of their life, their prices, and the operations for catching them, etc. The work has been printed in the Trivandrum Sanskrit Series, wherein the authorship of the work is attributed to Nīlakaṇṭha :—

१. नागोत्पत्तिः.
२. शुभलक्षणम्.
३. अशुभलक्षणम्.
४. आयुर्लक्षणम्.
५. वयोलक्षणम्.
६. माननिर्णयः.
७. मूल्याधिकारः.
८. सत्त्वलक्षणम्.
९. मदभेदः.
१०. गजग्रहः.
११. गजरक्षणदिनर्तुचर्या.
१२. आधोरणगुणादि.

Beginning :

नृसिंहयादवौ दैत्यसमूहोग्राटवीदवौ ।
राजमानौ भजे राजराजमङ्गलवासिनौ ॥
मातङ्गवक्त्रं प्रणिपत्य दृष्ट्वा मातङ्गशास्त्रं मुनिपुङ्गवोक्तम् ।
मातङ्गलीलाचलितान्तरात्मा मातङ्गलीलां रचयामि तावत् ॥
उत्पत्तिः शुभलक्षणान्यशुभलक्ष्मायुर्वयोलक्षणं
मानं मूल्यविशेषसत्त्वमदभेदाश्च क्रमाद्दन्तिनाम् ।
वन्यानां ग्रहणं च लक्षणविधिस्त्वाचारभेदादिकं
नागाध्यक्षगुणादिकं च सकलं सङ्क्षेपतो वक्ष्यते ॥

आसीदङ्गाधिराजः सुरपतिसदृशो विश्रुतो रोमपादो
गङ्गातीरे कदाचित्परिजनसहितः सोऽथ पम्पानगर्याम् ।
आसीनो रत्नपीठे विपिनगजकृतं सर्वसस्यादिनाशं
कैश्चिद्विज्ञापितोऽचिन्तयदवनिपतिः किं नु कार्यं मयेति ॥
कालेऽस्मिन् गौतमो नारदभृगुमृगचर्माग्निवेश्यारिमेदाः
काव्यो मातङ्गचर्योदय ऋषिवृषभा दैवतानां नियोगात् ।
पम्पां प्राप्ता नृपेणासनकुसुमजलाद्यैः समाराधितास्ते
वन्यान्नागान् ग्रहीतुं प्रददुरथ वरं नारदादङ्गपाय ॥

* * * *

शुश्रूषाद्यं च कृत्वा मुनिरथ जनकस्याश्रमात्पालकाप्यं
तं देशं प्राप्य यत्र स्थितमपि गजयूथं त्त(च)तस्मिन्नदृष्ट्वा ।
सर्वत्रान्विष्य पम्पां मुनिरथ गतवान् स्नेहतो व्याकुलात्मा
नागानां दुःखितानां व्रणशमनचिकित्सादिरक्षां चकार ॥
कश्चिन्नातिचिराद्भविष्यति मुनिर्मातङ्गबन्धुः परम्
आयुर्वेदपरायणोऽतिनिपुणो व्याधीन् हरिष्यत्यसौ ।
इत्युक्त्वा दिगनेकपाश्च विधिना याता यथास्वं दिशं
दिङ्मातङ्गकुलोद्भवाश्च पृथिवीं याताः परे शाव(प)तः ॥

See under the next number for the end.

No. 13325. मातङ्गलीला, केरलटीकासहिता.

MĀTAṄGALĪLĀ WITH MALAYĀLAM MEANING.

Substance, paper. Size, $11\frac{5}{8} \times 8\frac{5}{8}$ inches. Pages, 48. Lines, 18 on a page. Character, Telugu. Condition, good. Appearance, new.

Breaks off in the 11th Adhikāra.

Same work as the above.

See under the previous number for the beginning.

End:

गर्तं हस्तचतुष्कनिर्म(म्न)करयुगा(ग्म)व्यासदोःपञ्चका-
यामं वेणुदलैः कटैश्च विहितं कृत्वा मृदाच्छाद्य कं(तम्) ।
तस्मिन्भक्ष्यपरिस्तृते तु कलभानापातयित्वा भटा
बध्नीयुः सुदृढं गजग्रह इति प्रोक्तोऽवपाताह्वयः ॥

Colophon:

इति गजग्रहाधिकारो दशमः ॥

वन्यास्तत्र सुखोषिता विधिवशाद्ग्रामावतीर्णा गजा
बन्ध(द्धा)स्तीक्ष्णकटूग्रवाग्भिरतिशुग्भीमोहबन्धादिभिः
उद्विग्नाश्च मनश्शरीरजनितैर्दुःखैरतीवा(क्षमाः)
प्राणान्धारयितुं चिरं नरवशं प्राप्ताः स्वयूथादथ ॥

* * * *

बालातपः शशिकलारुचिरश्च शाली-
गोधूमधान्यमपि यत् क्रिमिभिर्न दुष्टम् ।
स्विन्नैरमीभिरुपकल्पित(क्लृप्त)मनल्पमांसं
भोज्यं गजस्य विनियोज्यमिदा(भा)गमज्ञैः ॥

No. **13326.** मातङ्गलीला, केरलटीकासहिता.

MĀTAṄGALĪLĀ WITH MALAYĀLAM MEANING.

Substance, palm-leaf (Śrītāla). Size, $9\frac{1}{8} \times 1\frac{7}{8}$ inches. Pages, 59. Lines, 10 on a page. Character, Malayāḷam. Condition, good. Appearance, old.

Breaks off in the 11th Adhikāra.

Same work as the above.

No. **13327.** मानप्रियमतम्.

MĀNAPRIYAMATAM.

Pages, 29. Lines, 17 on a page.

Begins on fol. 2*b* of the MS. described under No. 13317.

Breaks off in the sixth Adhyāya.

A treatise on the characteristics of good and bad horses with hints for ascertaining their age, etc. The name of the author is not given.

Deals with the following topics :—

१. अश्वप्रकृतिलक्षण.
२. अश्वशरीरावयवप्रमाण.
३. अश्ववयोज्ञान.
४. अश्ववर्णनिरूपण.
५. मिश्रलक्षण.
६. अश्वावर्तादि.

Beginning:

अमृतात्पूषणाद्वह्नेः देवाग्र(द)ण्डाश्र(च्च)गर्भतः ।
साम्नो हयानामुत्पत्तिः सप्तधा परिकीर्तिता ॥

कृते युगेऽश्विजे मासि शुक्लेऽ(थ)प्रतिपत्तिथौ ।
सोमवारेऽश्विनीऋक्षे ब्रह्मा लोकपितामहः ॥
मन्त्रकल्परहस्येन कृत्वा देयमतच्छुभाम् ।
वेदोक्तेनैव मार्गेण जुहुयादग्निदानतः ॥

End:

ये तेन चिरायुषा शुभकरा यत्नात्परीक्षा(क्ष्या)हयाः
गन्धान्मूत्रशकृन्मलेषु नवसु द्वारेषु कर्णेऽपि च ॥

Colophon:

इति मानप्रियमते अश्वशास्त्रे उत्स्मयस्थाने गन्धलक्षणं नाम पञ्चमोऽध्यायः ॥

तत्र प्रधाना ह्यावर्ता शुक्तिशुक्तिसमो भवेत् ।
वत्सजां स्वावलीदेव हशोह्यवलीढकम्(?) ॥
* * * *
अपानक्रोष्ठनाभिनां दुर्भरं शन्द्रमाण्डकः ।
शिवने प्रलजानां च सपाक्षः पर्ति कुम्भकः(?) ॥

MEDICINE—SUPPLEMENT.

No. **13328.** अष्टाङ्गहृदयम्.

ASṬĀṄGAHṚDAYAM.

Substance, palm-leaf. Size, $14\frac{3}{8} \times 1\frac{1}{4}$ inches. Pages, 360. Lines, 5 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Contains the Adhyāyas one to seven in the Nidānasthāna.

Same work as that described under No. 13072.

No. **13329.** अष्टाङ्गहृदयम्, आन्ध्रटीकासहितम्.

ASṬĀṄGAHṚDAYAM WITH TELUGU MEANING.

Pages, 10. Lines, 34 on a page.

Begins on fol. 103*a* of the MS. described under No. 13310.

Contains the 15th Adhyāya in the Sūtrasthāna.

Same work as the above

No. 13330. अष्टाङ्गहृदयम्, आन्ध्रटीकासहितम्.

AṢṬĀṄGAHṚDAYAM WITH TELUGU MEANING.

Pages, 28. Lines, 8 on a page.

Begins on fol. 97*a* of the MS. described under No. 13224.

Breaks off in the Dinacaryādhyāya of the Sūtrasthāna.

Same work as the above.

No. 13331. अष्टाङ्गहृदयम्.

AṢṬĀṄGAHṚDAYAM

Pages, 15. Lines, 6 on a page.

Begins on fol. 32*a* of the MS. described under No. 13249.

Contains the first Adhyāya of the Cikitsāsthāna.

Same work as the above.

No. 13332. आयुर्वेदः.

ĀYURVĒDAḤ.

Pages, 5. Lines, 6 on a page.

Begins on fol. 4*b* of the MS. described under No. 13122.

Incomplete.

Same work as that described under No. 13086 ante.

No. 13333. आयुर्वेदः.

ĀYURVĒDAḤ

Pages, 6. Lines, 5 on a page.

Begins on fol. 59*b* of the MS. described under No. 13115.

Incomplete.

Same work as the above.

No. 13334. आयुर्वेदः, आन्ध्रटीकासहितः.

ĀYURVĒDAḤ WITH TELUGU MEANING.

Substance, paper. Size, $9\frac{1}{4} \times 7\frac{5}{8}$ inches. Pages, 18. Lines, 26 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Begins on fol. 1*a*. The other works herein are Vaidyaviṣaya 9*b*, Nidānaviṣaya 24*b*.

Same work as that described under No. 13086 ante, wherein see for the beginning.

End :

अथातस्सम्प्रवक्ष्यामि सङ्क्षिप्तं सूक्ष्ममुत्तमम् ।
आयुर्वेदोपदेशेऽस्मिन्नष्टधातुर्निगद्यते ॥

* * * *

सद्यः स्नानं च भुक्तस्य क्षुत्तृष्णातपशीलिता ।
व्यायामाक्रान्तभीतस्थो भूतवेगश्च रोदनम् ॥
सुन्दरीणां च संयोगे मद्यपानमतिभ्रमः ।
गान्धारीभक्षकश्चैव पवनाभ्याससाधकः ॥
अपस्मारश्रान्तदेही नाडी सम्यग्न विद्यते ।

No. 13335. औषधयोगग्रन्थः, आन्ध्रटीकासहितः.
AUṢADHAYŌGAGRANTHAH WITH TELUGU. MEANING.

Pages, 28. Lines, 5 on a page.

Begins on fol. 35*a* of the MS. described under No. 13174.

Wants the beginning and the end.

Similar to the work described under No. 13110.

Beginning :

न्यग्रोधादिघृतम्—

न्यग्रोधपिप्पलसदाफललोध्रयुग्मं जम्बूद्वयार्जुनक . . मवल्काः ।
वृक्षाम्रवञ्जुलप्रियालुपलाशनन्दि काशिकभसरलामधुकं मधूकैः(?) ॥

* * * *

आदौ न प्रतिकर्तव्यं व्याधिदोषेण दुर्जयः ॥
मधूकपीठं सितया च युक्तं स्तन्येन नस्यं विनिहन्ति मूर्च्छाम ।
स्तन्येन इक्षुस्वरसेन नस्यं न चन्दनेन विनिहन्ति मूर्च्छाम् ॥
कुङ्कुमं शर्करायुक्तं घृते वा पयसस्तथा ।
मूर्च्छामदविकारघ्नं वायुनोन्मादपैत्त्यजित् ॥

End :

तालीसपत्रं गजकेसराणां लवङ्गत्वक्क्षीरिकटुत्रयं च ।
भृङ्गं विलङ्गात्रिफला च क्षौद्रैरेतानि चूर्णानि समांशकानि ॥

* * * *

No. 13336. क्षयरोगनिदानम्.
KSAYARŌGANIDĀNAM.

Pages, 9. Lines, 7 on a page.

Begins on fol. 93*a* of the MS. described under No. 13224.

Incomplete.

Similar to the work described under No. 13188 ante.

Beginning :

क्षयरोगनिदानम्—

क्षयरोगज्वरो राजा तस्य पत्नी च कामिला ।
चमूपतिः पाण्डुरोगी(गः) रक्तपित्तं तु पुत्रिका ॥
सखा शोफातिसारं च मन्त्रिणः श्वासकासकाः ॥

* * * *

निदानम्—

वातपित्तकफं चैव वातश्लेष्मक्षयानि च ।
वातपित्तक्षयं नाम पित्तश्लेष्मक्षयानि च ॥

* * * *

विविधा विंशतिर्नाम क्षयरोगश्च दारुणः ॥

End :

धात्रीखर्जूरद्राक्षा च मरिचं चणकानि च ।
शिग्रुशाकं च मत्साक्षी शोकिनी शाकलुङ्ककम् ॥
चक्रवर्तं मेघनादं शोफघ्नी चाम्रकानि च ।
एतानि पथ्यमाप्नोति विंशतिक्षयरोगजित् ॥

No. 13337. गन्धककल्पः.
GANDHAKAKALPAH.

Substance, paper. Size, 6¾ × 4⅜ inches. Pages, 12. Lines, 20 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 8*a*. The other work herein is Viṣavaidya 1*a*.

Complete.

On the medicinal properties of sulphur and on details connected with the preparation of medicines from it.

Beginning :

गन्धकोत्पत्तिः—

गन्धकस्यापि माहात्म्यं तद्रुक्षं वद मे प्रभो ।

ईश्वर उवाच—

श्वेतद्वीपे पुरा देवि सर्वरत्नविभूषिते ।
सर्वकाममये रम्ये तीरे क्षीरपयोनिधौ(धेः) ॥

* * * *

क्षीराब्धिमथने चैव अमृतेन सहोदितम् ।
निजगन्धेन सर्वाणि हर्षयन् सर्वदानवान् ॥
ततो देवगणैर्युक्तं गन्धकाख्यो भवेत् स्वयम् ।
योगस्ते पारदप्रोक्तं ते चैवात्राभवन्निति ॥
इति देवगणैः प्रीतिः पुरा प्रोक्ता सुरेश्वरि ।
तेनेमं गन्धकं नाम विख्यातः क्षितिमण्डले ॥

* * * *

मृतं गन्धकमादाय भाव्यं च तथैव च ।
. . . . तथैव च भगन्धरम् ॥
येन सर्वप्राणिरोगास्त्वग्दोषाजनितस्तथा ।
नश्यन्ति वेदनाः सर्वे गन्धकस्य प्रसाधितम् ॥
षण्मासिकप्रयोगेण श्रृणु वक्ष्यामि तत्फलम् ॥
हंसवर्णेन केशाश्च भवन्त्यलिसमप्रभाः ।
व्रणवातं च गुल्मं च कफवातं च कण्डुताम् ॥

End :

तदुपरियन्तरकाश्यापात्रे निहितं सर्वक्रिमिनाशं च ।
वातपैत्त्यकफरोगविनाशं तन्नामेवागन्धकसारम्(?) ॥

इति धन्वन्तरिमुखोद्भववाक्यम् ।

शुद्धगन्धं हरेद्रोगान् कृष्णो मृत्युजरापहः ।
भूतशोफानिलश्लेष्म वीर्यवृद्धिं करोति च ॥
ब्राह्मणः सर्वलोहघ्नः क्षत्रियो धातुवादकृत् ।
रसे रसायने वैश्यः शूद्रो जन्मजरापहा ॥

No. 13338. चिकित्सातिलकम्.
CIKITSĀTILAKAM.

Substance, palm-leaf. Size, 16⅜ × 1½ inches. Pages, 92. Lines, 8 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Breaks off in the Sūtrasthāna

Same work as that described under R. No. 373(*b*) of the Triennial Catalogue of MSS., Vol. I. Part I-B. By Śrīnivāsārya, son of Raghunātha, grandson of Aijanāgārya of Kauśikagōtra and belonging to the Ārvēla family.

No 13339. चूर्णलेह्यक्रमः.
CŪRṆALĒHYAKRAMAḤ.

Pages, 12. Lines, 5 on a page.

Begins on fol. 38*a* of the MS. described under **No. 13083.**

Incomplete.

Gives the preparation of certain medicinal powders and electuaries, with a statement of the ailments cured by them.

Beginning:

अश्वगन्धा जटामांसी प्रियङ्गुमधुयष्टिका ।
मुस्ता धात्रीद्वयं द्राक्षा कुङ्कुमं दाडिमीफलम् ॥
तगरं मुसली जाजी जीरकं मरिचं तथा ।
खर्जूरं च शिलादारु कोष्ठं नीलोत्पलानि च ॥

* * * *

अश्वगन्धादिचूर्णेन सर्वव्याधिनिवारणम् ॥

* * * *

शतावरीमूलकल्पं कल्पा क्षीरं चतुर्गुणम् ।
क्षीरं पादघृतं गव्यं घृतशेषं विपाचयेत् ॥
गुडेन शितया वाथ पलार्धं लेहयेत्सदा ।
असृक्पैत्यं वातपैत्त्यं मूर्च्छाश्वासं च नाशयेत् ॥

End:

कूश्माण्डरसायनम्—

पीतत्वगतिकूश्माण्डं यूना चुल्यां पुनः पचेत् ।
घटयेत्सर्पिषः प्रस्थे क्षौद्रवर्णेऽत्र च क्षिपेत् ॥

No. **13340.** जीर्णकालप्रमाणम्, आन्ध्रटीकासहितम्.

JĪRṆAKĀLAPRAMĀṆAM WITH TELUGU MEANING.

Pages, 7. Lines, 6 on a page.

Begins on fol. 7*b* of the MS. described under No. 13188.

Incomplete.

On the duration of time required for digesting different substances.

Beginning:

रसं सप्तघटीजीर्णे लेहृतां पञ्चमीघटी ।
अष्टमं स्वरसं जीर्णे कषायं च चतुर्थकम् ॥
कल्कं चूर्णं च घटिका घटिकाद्वयमेव च ।
शीताम्बु जीर्यते याममुष्णाम्बु घटिकात्रयम् ॥
पिष्टं दशघटी जीर्णे क्षीरं जीर्णे त्रयोदश ॥

End:

कासीसं कृष्णनागं क्षितिधररुधिरं नीलमभ्रं सुकान्तं
हेमाङ्गं भूमिसारं सलिलरिपुदलं हेमपुष्पारिबीजम् ।
गोरेखाशातिमेघाक्षितिबलसहितं रोहिणी चाक्षमिश्रं
सर्वं सन्व्येक्षतोयैः कविविजयफलैर्मोदकानक्षमात्रान् ॥
कुर्याच्चक्रेण पेयं क्षपयति निखिलं मूत्रणी . . . . .

No. **13341.** नाडीचक्रविधिः.

NĀḌĪCAKRAVIDHIḤ.

Pages, 11. Lines, 6 on a page.

Begins on fol. 11*a* of the MS. described under No. 13231.

Incomplete.

Gives some particulars regarding the blood-vessels in the human body, such as their number, the position of the important ones among them, etc.

Beginning:

अथातः संप्रवक्ष्यामि नाडीचक्रमनुत्तमम् ।
श्रद्धया मम भक्त्या च वि(द्धि)वाचस्पतेऽधुना ।
शरीरं तावदेवं स्यात् षण्णवत्यङ्गुलात्मकम् ।
मनुष्या(णां) मुनिश्रेष्ठे स्वाङ्गुलीभिरिति . . . ॥

* * * *

कुन्दमध्यास्थिता नाडी सुषुम्णा सुप्रतिष्ठिता ।
तिष्ठ(न्ति)परितस्तस्या नाड्यो मुनिसत्तम ॥

द्विसप्ततिसहस्राणि तासां मुख्याश्चतुर्दश ।
सुषुम्णा पिङ्गला तद्वादिडा चैव सरस्वती ॥

* * * *

Colophon:

इत्यादिनाडीचक्रविधिर्नाम एकादशोऽध्यायः ॥

End:

सहसा यो विमु योद्यो? विवक्षुर्ने स जीवति ।
स्वरस्वरूपो लाभो वा हानिं च बलनिर्णयः ॥
रोगस्य.

No. **13342.** नाडीविज्ञानम्, आन्ध्रटीकासहितम्.

NĀḌĪVIJÑĀNAM WITH TELUGU MEANING.

Pages, 19. Lines, 7 on a page.

Begins on fol. 65*b* of the MS. described under No. 13224.

Incomplete.

See in the work described under No. 13154 for the beginning

End:

प्रातः श्लेष्मवती नाडी मध्याह्ने चातिपित्तगा ।
अपरावातकं ज्ञेयं सन्निपाते विलक्षणा ॥

* * * *

No. **13343.** नाडीशास्त्रम्.

NĀḌĪŚĀSTRAM.

Pages, 7. Lines, 5 on a page.

Begins on fol. 25*a* of the MS. described under No. 13083.

Complete.

A treatise bearing on the science of feeling the pulse.

Name of the scribe: Śēṣayya, son of Sōlē Muttayyan. **Date of transcription**: 26th of Paṅguni in the year Rudhirōdgāri.

Beginning:

नाडीशास्त्रं प्रवक्ष्यामि सर्वं विस्तारसांप्रतम् ।
शारीरमूलमाधारं वातमाश्रित्य देहिनाम् ॥
आदौ वातं मध्यपित्तमन्त्यश्लेष्मं प्रवर्तते ।
मायूरगजहंसकुक्कटगतिं गम्यं स्थिरं वातजं
मण्डूकापिककालावुकगतिं पित्तस्य हृद्यं गतम् ।
कूर्मसर्पजलूकजलचरगतिं श्लेष्मं महन्निश्रितम् ॥

End:

गतौ मन्दा तथा सूक्ष्मा त्रिभेदं नाडिलक्षणम् ।
सततं नाडिरूपेण रोगकालं भविष्यति ॥

* * * *

रक्तमामातिसारं च सरुजं प्रतिमेहनम् ।
दाडिमद्रि(मादि)प्रयोगोऽयमतिसारकुठारकः ॥

Colophon:

नाडीकालं सम्पूर्णम् ॥

No. 13344. निदानविषयः.
NIDĀNAVIṢAYAḤ.

Pages, 23. Lines, 10 on a page.

Begins on fol. 29*a* of the MS. described under No. 13247.

Contains the first Ullāsa only.

Same work as that described under No. 13166, wherein see for the beginning

End:

वृद्धानामतिसारिणां ग्रहणिनां निर्वीर्यहृद्रोगिणां
बालानामपि गर्भिणीक्षयरुजां संवर्जयेल्लङ्घनम् ।
पूर्वं रोगनिदानमत्र नितरां ज्ञात्वा चिकित्साक्रियां
कुर्यात्कालवयोऽतिरेकमतिमान् प्रत्यक्षधन्वन्तरिः ॥

* * * *

आयुर्वेददवाहटप्रमुखशास्त्रार्थेषु दक्षं शुचिं
सद्वंश्यं गतमत्सरामृतकरं सत्योक्तिमल्पोत्सुकम् ।
शान्तं कान्ततनुं युवानमरुजं वैद्यं चिकित्साकरं
विश्वासोपगतं समीक्ष्य विपदो गच्छन्ति तद्दर्शनात् ॥

Colophon:

इति निदाने प्रथमोल्लासः ॥

* * * *

धर्मिष्ठः सत्यवान् विद्वान् देवपूजापरायणः ।
सदयः पद्महस्तश्च स योग्यो रसवैद्यके ॥

No. 13345. निदानविषयः, आन्ध्रटीकासहितः.
NIDĀNAVIṢAYAḤ WITH TELUGU MEANING.

Pages, 23. Lines, 26 on a page.

Begins on fol. 24*b* of the MS. described under No. 13334.

On the diagnosis of diseases and on their treatment.

Beginning:

भिषक् तु भेषजं वारि स्वायत्तं लिङ्गने शुचिः ।
सिद्धसौख्यं धृते रेखा शरीरं नोदिमं भवेत् ॥
इन्द्रियाणि प्रसन्नानि बुद्धिः प्रकृतिमागता ।
शरीरे यस्य नैर्मल्यं स रोगी नैव नश्यति ॥

* * * *

वातज्वरनिदानम्—

रोमाश्वलोचननिमीलितकम्पकार्श्यं
व्यजृम्भणानि नखरेषु तनौ च कुष्ठम् ।
श्वासभ्रमो प्रदिवनं मधुरं मुखं च
वातज्वरे भवति कुक्षिशिरोव्यथा च(?) ॥

End:

चिकित्सासारसङ्ग्रहे—

ज्वरं शुष्कं च शीतं च स्वेदमूर्च्छातिकम्पितम् ।
मन्दाग्निर्मलबन्धं च कासश्वासबलक्षयम् ॥
शिरोऽक्षिवेदनं शूलमरोचकविरेचनम् ।
निस्सत्त्वं कान्तिहीनत्वमुद्गारवमनानि च ।
जिह्वावदनतिक्तं च ज्वरं मांसगतानि च ।

चिकित्सा—

ममाभिषेकनिरतं महालक्ष्मेश्वरीरसम् ।
मांसगतज्वरं हन्ति हन्ति सत्यं न संशयः ॥

No. 13346. परहितसंहिता.
PARAHITASAMHITĀ.

Substance, palm-leaf (Śrītāla). Size, $17\frac{1}{8} \times 1\frac{3}{8}$ inches. Pages, 128. Lines, 9 on a page. Character, Nandināgarī. Condition, good. Appearance, old.

Contains the Aṣṭāṅgakāṇḍa complete in eight Adhikāras, the beginning being wanting in the first Adhikāra. The headings of the Adhikāras are given thus:

१. . . . .
२. कौमीरतन्त्राधिकारः.
३. भूतविद्याधिकारः.
४. दाहचिकित्साधिकारः.
५. शल्याधिकारः.
६. सर्वशल्याधिकारः.
७. रसायनाधिकारः.
८. वाजीकरणाधिकारः.

This comprehensive medical work consists of many Kāṇḍas of which this MS. contains the Aṣṭāṅgakāṇḍa treating of the eight topics dealt with in Vāghbhaṭa's Aṣṭāṅgahṛdaya. The author is Śrīnāthapaṇḍita.

Beginning:

तृट्क्षुधाहर्षशोकमैथुनभि . . धः बद्धचित्रोक्तम् । ?
छोमुखा शय्या सत्त्वौदार्यं तमोजयः ॥ ?
रूक्षान्नं चाहितं निद्रां वारयन्तीं प्रसङ्गिनीम् ।
एत एव च विज्ञेया निद्रानाशस्य हेतवः ॥
को . . . . धं क्षयो व्याधिवृद्धिश्चानिलपित्तयोः ।
निद्रानाशादङ्गमर्दगौरवादास्यजृम्भिताः ॥

* * * *

जाड्यग्लानीक्लमापत्तितन्द्रारोगाश्च वातजाः ।
शोधयेन्मन्दनिद्रस्तु क्षीरमिक्षुरसं रसान् ॥
अनूपौदकमाज्यान्नं भक्ष्यागौडिकपैष्टिकान् ।
शालिमद्यानि माषांश्च किलाटं माहिषं दधि ॥

* * * *

Colophon:

इत्यष्टाङ्गकाण्डे प्रथमाधिकारः ॥

अथ कौमारतन्त्रः—

रजोयोनिगतैर्दोषैः पाप्मभिः कर्मभिस्तथा ।
वन्ध्या भवेद्वधूस्तद्वत् पुरुषः शुक्रगैर्मलैः ॥

रसरत्नसमुच्चये—

भेदा वन्ध्यावधूनां हि नवधा परिकीर्तिताः ।
तत्रादिपापकर्मण . . . . निमित्ताः ॥
उक्तैरथ पृथग्दोषैः समस्तैः पञ्चधा स्मृताः ।
भूतदेवाभिचारैश्च तिस्रो वन्ध्याः प्रकीर्तिताः ॥
पुमानपि भवेद्वन्ध्यो दोषैरेभिश्च शुक्रतः ।
गर्भस्रावी ता(भवेत्)पूर्वा मृतवत्सा . . . . ॥

End:

नारिकेलफल . . . भावितं माषचूर्णपिटकं मृते श्रितम् ।
भक्षयन् पिबति यो गवां पयो यात्यपूर्वमिव योषितां शतम् ॥
चरितैर्निर्विकारा या विकारैरिव निर्मिता ।
कान्तानुवर्तिपरमा सा स्त्री वृष्यतमा मता ॥
यत्किञ्चिन्मधुरं स्निग्धं बृंहणं गुरु शीतलम् ।
मनसो हर्षणं यच्च तत्सर्वं वृष्यमुच्यते ॥
स्रोतस्सु शुद्धेष्वमले च चित्ते वृष्यं यथा यो मितमत्ति काले ।
वृषायते नानपरं . . . . ॥

Colophon:

इति श्रीनाथपण्डितस्य कृतौ परहितसंहितायामष्टाङ्गकाण्डे अष्टमोऽध्यायः ।
अष्टाङ्गकाण्डः समाप्तः ॥

No. **13347.** बसवराजीयम्, आन्ध्रटीकासहितम्.
BASAVARĀJĪYAM WITH TELUGU MEANING.

Substance, palm-leaf. Size, 17⅜ × 1⅜ inches. Pages, 196. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

Breaks off in the sixth Prakaraṇa.

A complete system of medicine. The author is Nīlakaṇṭhakōṭṭūru Basavarāja, son of Namaśśivāya and disciple of Rāmadēśika of Niḍimāmiḍi family. This work is printed in Telugu character. It is also called Vṛṣabharājīya.

Date of copying: Friday, the 8th day of the dark fortnight of the Bhādrapada month in the year Rākṣasa.

Beginning:

श्रीनीलकण्ठं भुजगेन्द्रभूषं नागाजिनं राजकलावतंसम् ।
गौरीश्वरं देवमुनीन्द्रसेव्यं देवं भजे श्रीगिरिराजनाथम् ॥
श्रीनीलकण्ठवंशाब्धिचन्द्रमा बसवाह्वयः ।
वक्ष्यामि वृषराजीयमहावैद्यशिखामणिम् ॥

* * * *

उवाच देवमहारोगविनाशनाय नानाविधाय भवचित्तविनिर्मितार्थैः ।
ब्रह्मादिविष्णुसुरसिद्धविलोलचित्तैर्ज्ञात्वा विजृम्भणमहावृषकं स्मरामि ॥

* * * *

कृतेषु चरकं प्रोक्तं त्रेते सिद्धरसार्णवम् ।
द्वापरे सिद्धविद्याभूः कलौ बसवकं स्मृतम् ॥

* * * *

श्रुत्वा समस्तं क्रियते च सारं धन्वन्तरोक्तं बहुजालयुक्तम् ।
कायादिबालग्रहरोगसङ्घान् चिकित्सकाद्या रसधातुशोधनम् ॥
कषायचूर्णाघुटिकानुपाने तैलादिलेह्यं घृतयन्त्रमन्त्रान् ।
रत्नादिशुद्धिं विषमर्भवारणं पाषाणमाद्यं सकलं च शुद्धिम् ॥
अस्य प्रवक्ष्ये अथ देशकालान् लिङ्गाख्यदेहान् विकृतिं मलादीन् ।
सनाडिकाख्ये अथ दूतचिह्नं कुपथ्यपथ्यानघमामयादीन् ॥
ज्वरादिमूलान् सकलांश्च रोगान् ज्ञात्वा भिषक् कर्म समारभामहे ॥

ज्वरोत्पत्तिः—

युगक्रमा धर्मवरस्य नाशो तथाक्रमा जीवगतश्शरीरे ।
कृतौ युगे मस्तिगतस्सजीवो त्रेतायुगे मज्जगतो विधेयः ॥
द्वापारके मांसगतस्सजीवो कलौ युगे तिष्ठति चान्नपानैः ॥
ज्ञात्वा प्रयोगं क्रियते बुधो कलौ प्रयोगमिच्छां सुतरां सवैद्यम् ।

* * * *

Colophon:

इति श्रीनीलकण्ठचरणारविन्दतीर्थप्रसादपारावारभोगविहारपारीणानिडिमामिडिभगीयसत्सम्प्रदायकाराध्यरामदेशिकशिष्योत्तमनमश्शिवायसत्पुत्रपवित्रकविताचमत्कारवैद्यजनशिरोभूषणनीलकण्ठकोट्टूरु(बसवराज)नामधेयप्रणीतं श्रीबसवराजीयमष्टधातुनिदानं ज्वरनिदानसाध्यासाध्यलक्षणपथ्यापथ्यतच्चिकित्सालक्षणं नाम प्रथमं प्रकरणम् ॥

See under the next number for the end.

No. **13348.** बसवराजीयम्, आन्ध्रटीकासहितम्.

BASAVARĀJĪYAM WITH TELUGU MEANING.

Substance, palm-leaf. Size, 18 × 1⅝ inches. Pages, 68. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other works herein are Vaidyacintāmaṇi (with Telugu meaning) 36*a*, Śatayōgagrantha (with Telugu meaning) 53*a*.

Contains the 25th Prakaraṇa only.

Same work as the above, wherein see for the beginning.

Date of copying: Monday, the 13th day of the dark fortnight of the Caitra month in the year Īśvara.

End:

एकनिष्कं तु मरिचं द्विनिष्कं टङ्कणं तथा ।
त्रिनिष्कं पारदं चैव चतुर्निष्कं तु मागधी ॥
गन्धकं पञ्चनिष्कं तु षण्णिष्कं तु महौषधि ।
सर्वे एते समं कुर्या . . . . ॥
इच्छाभेदिरसो नाम गुञ्जामात्रप्रयोगिकम् ।
गुल्मोदावर्तशूलानि शोफवातकफानिलाः ॥
हन्ति सर्वाणि शूलानि सुखोपायविरेचनम् ॥

* * * *

Colophon:

इति श्रीनीलकण्ठचरणारविन्दतीर्थप्रसादवारभोगविहरनिडिमामिडिबागितत्सा-म्प्रदायकाराध्यरामदेशिकशिष्योत्तमनमःशिवायसत्पुत्रकविताचमत्कारवैद्यजनशिरो-भूषणनीलकण्ठकोट्टरुनामप्रणी(ते) (बसवराजीये) नवरत्नशुद्धिप्रकारं नाम पञ्च-विंशतिप्रकरणं समाप्तम् ।।

No. 13349. बसवराजीयम्, आन्ध्रटीकासहितम्.
BASAVARĀJĪYAM WITH TELUGU MEANING.

Pages, 138. Lines, 24 on a page.

Begins on fol. 1*a* of the MS. described under No. 13310.

Contains the Prakaraṇas 19 and 8 complete, 10 and 4 (incomplete).

Same work as the above.

No. 13350. बसवराजीयम्, आन्ध्रटीकासहितम्.
BASAVARĀJĪYAM WITH TELUGU MEANING.

Pages, 47. Lines, 5 on a page.

Begins on fol. 21*a* of the MS. described under No. 13129.

Contains the 25th Prakaraṇa.

Same work as the above.

No. 13351. बसवराजीयम्.
BASAVARĀJĪYAM

Pages, 11. Lines, 5 on a page.

Begins on fol. 77*a* of the MS. described under No. 1724.

Contains the third Prakaraṇa only.

Same work as the above.

No. 13352. बसवराजीयम्, आन्ध्रटीकासहितम्.

BASAVARĀJĪYAM WITH TELUGU MEANING.

Substance, palm-leaf. Size, $15\frac{7}{8} \times 1\frac{1}{4}$ inches. Pages, 292. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

Contains six Prakaraṇas only.

Same work as the above.

No. 13353. बसवराजीयम्, आन्ध्रटीकासहितम्.

BASAVARĀJĪYAM WITH TELUGU MEANING.

Pages, 158. Lines, 7 on a page.

Begins on fol. 10*a* of the MS. described under No. 13204.

Contains the 17th Prakaraṇa incomplete.

Same work as the above.

No. 13354. भेषजकल्पः.

BHĒṢAJAKALPAḤ.

Pages, 3. Lines, 5 on a page.

Begins on fol. 17*a* of the MS. described under No. 13231.

Incomplete.

Same work as that described under No. 13181 ante.

No. 13355. मदनविनोदननिघण्टुः.

MADANAVINŌDANANIGHAṆṬUḤ.

Pages, 7. Lines, 5 on a page.

Begins on fol. 18*a* of the MS. described under No. 13174.

Wants the beginning in the second Varga and the end in the third Varga.

Same work as that described under No. 13299 ante.

No. 13356 रसादियोगग्रन्थः, आन्ध्रटीकासहितः.

RASĀDIYŌGAGRANTHAḤ WITH TELUGU MEANING

Pages, 48. Lines, 8 on a page.

Begins on fol. 108*a* of the MS. described under No. 13082.

On the purification of mercury and oth inorganic substances for medicinal purposes and on the preparation of medicines therefrom for curing different kinds of diseases, the names of which are also mentioned.

Beginning :

अभ्रमाक्षिकवैकान्तं विमलाद्रिजनस्यकम् ।
चपला रसकश्चेति एषां शुद्धिर्विधीयते ॥
पिनाकं दर्दुरं नाग वज्रं चेति चतुर्विधम् ।
प्रत्येकं तस्य भेदस्य वज्रं द्राव्यं नभापरम् (?) ॥

* * * *

पुनर्नवेन चूर्णेन शोफघ्नं परमौषधम् ॥
शतधा तेन गगनं यक्ष्मकासप्रशान्तये ।
गगनं सर्वरोगघ्नं वृष्यबृंहणमुत्तमम् ॥

End :

सुवर्णवसन्तमालिनीरसम्—

सुवर्णयुक्तं दरदं मरीचं . . भागवृद्ध्या प्रदेयम् ।
खर्पर्यष्टौ प्रथमं नावनीते तेन निम्बाम्बुमर्घम् ॥
एवं मेहं व्रजति विलयं नीयते तेन मर्घ
गुञ्जाद्वन्द्वं मधुकरयुतम्.

No. **13357.** विषवैद्यम् , आन्ध्रटीकासहितम्.
VIṢAVAIDYAM WITH TELUGU MEANING.

Pages, 12. Lines, 15 on a page.

Begins on fol. 1*a* of the MS. described under No. 13337.

On the mode of using different kinds of poisonous substances after necessary purification in the preparation of certain medicines.

Beginning :

कोलाहलं वत्सनाभं कालकूटं महाविषम् ।
बालं कर्दमकं मुस्ता पुण्डरीकं विराटकम् ॥
सर्षकं मूलकं शृङ्गी मर्कटी चेति कन्दजम् ।
विषं त्रयोदशविधमिति धन्वन्तरीमतम् ॥

* * * *

ग्रन्थान्तरे—

चतुर्थं वर्णभेदेन विज्ञेयं तन्मनीषिभिः ।
ब्रह्मक्षत्रियविट्छूद्रैः श्वेतरक्तश्च पीतकः ॥
कृष्णवर्णक्रमज्ञेयं वर्णानामानुपूर्ववत् ।

* * * *

विषं गोमूत्रसंयुक्तं छागमूत्रेण चाथ वा ।
आतपे भावितं यामं शुद्धिर्भवति निश्चयम् ॥

विषप्रयोगः—

कस्तुकाद्याः प्रयुञ्जीत सर्वरोगे रसायने ।
तुर्येण टङ्कणेनैव म्रियते पेषयेद्भिषक ॥

* * * *

विषं पादाश्व(श्व)गन्धा च वचा तालिसपत्रकम् ।
मरीचं पिप्पली निम्बमजामूत्रेण तुल्यकम् ॥
वटका पूर्ववत्कार्यं जयन्ति योगवाहकाः ।

इति । रसरत्नाकरे.

End:

कटुः सांतिक्ताम्लरसा लघूष्णा रुचिप्रदा च ज्वरहारिणी च ।
कफास्रकण्डूतिमदोषहन्त्री वक्त्रामयध्वंसकरी च शस्याः ॥*

मालवे प्रसिद्धाः.

No. 13358. वैद्यग्रन्थः.
VAIDYAGRANTHAḤ.

Pages, 8. Lines, 6 on a page.

Begins on fol. 56*a* of the MS. described under No. 13115, wherein this work has been omitted in the list of other works.

On the different diseases resulting from the predominence in the human body of any one of the three humours वात, पित or कफ.

Beginning:

अशीतिर्वातजा रोगा जायन्ते वातकोपनंम् ।
रुक्तो(द)भेदसङ्कोचशोषवेष्टनलक्षणः ॥
सर्वाङ्गं चोदरं पार्श्वं विकटाङ्गं कटिस्थलम् ।
हस्तपादं च एकैकं पादहस्तद्वयान्वितम् ॥
अङ्गुलीजत्रुकावर्तनेत्रं चैव शिरोरुजान् ।

End:

कफप्रकोपं वमनं च नस्य संसर्गदोषा भिषजेन तज्ज्ञाः ।
बाहुश्चरणयोः सन्धौ नाभिश्च ह्यङ्गुला तथा ।
मस्तकं हस्तयोर्मूले मध्ये च स्तनकक्षयोः ॥

* * * *

असाध्यं सन्निपाते च व्रणवातनिवारणम् ॥

No. 13359. वैद्यग्रन्थः.
VAIDYAGRANTHAḤ.

Pages, 8. Lines, 7 on a page.

Begins on fol. 1*a* of the MS described under No. 13122.

Same work as the above.

Date of copying: 10th day of the dark fortnight of the Jyēṣṭha month in the year Manmatha.

No. 13360. वैद्यग्रन्थः, आन्ध्रटीकासहितः.
VAIDYAGRANTHAḤ WITH TELUGU MEANING.

Pages, 28. Lines, 9 on a page.

Begins on fol. 90*a* of the MS. described under No. 13082.

Deals with diseases and their treatment; gives also the properties of mercury, and the method of purifying it, etc.

Beginning:

शुष्कमांसं स्त्रियो वृद्धा बालार्कस्तरुणी दधि ।
प्रभाते सङ्गमे निद्रा सद्यः प्राणहराणि षट् ॥
सद्योमांसं नवान्नं च बालस्त्री क्षीरभोजनम् ।
घृतमुष्णोदकं चैव सद्यः प्राणकराणि षट् ॥
सद्यो बलकरं त्रीणि वारि वारिचराः पय ।
सद्यो बलहरं त्रीणि तैलमातपसङ्गमः ॥

* * * *

ग्रन्थान्तरे—

लवणं सर्षपं तैलमाम्लमायानमानभम्(?) ।
असद्यं सङ्गमक्रोधः अनृतं सर्वरोगकृत् ॥

* * * *

एषां रससमुत्पत्तिं यो जानाति स धार्मिकः ।
आयुरारोग्यसन्तानं नरस्सिद्धिं च विन्दति ॥
रसानां सर्वधातूनां रसेन्द्र इति कीर्तितः ।
देहं लोहमयं सिद्धिं सूते सूत इति स्मृतः ॥

End:

रसनियमगुणः—
सर्पाक्षीवन्ध्यकर्कोटी कञ्चुकी जलशम्बुका ।
शतावरी भृङ्गराजं शरपुङ्खी पुनर्नवी ॥
मण्डूकपर्णी मत्स्याक्षी ब्रह्मदण्डी शिखण्डिनी ।
* * * *
एषां नियामकौषध्यः मूलपुष्पफलान्विताः ।
क्षालने स्वेदने चै(व)मूषा च वचपूजितम् ॥

No **13361.** वैद्यचिन्तामणिः, आन्ध्रटीकासहितः.
VAIDYACINTĀMAṆIḤ WITH TELUGU MEANING.

Pages, 50. Lines, 5 on a page.

Begins on fol. 171*a* of the MS. described under No. 13115.
Breaks off in the second Vilāsa.
Same work as that described under No 13095 *ante.*

No. **13362.** वैद्यचिन्तामणिः.
VAIDYACINTĀMAṆIḤ.

Pages, 41. Lines, 6 on a page.

Begins on fol. 106*a* of the MS. described under No. 1312?.
Contains the first Vilāsa complete and the second almost complete.
Same work as the above

No. **13363.** वैद्यचिन्तामणिः, आन्ध्रटीकासहितः.
VAIDYACINTĀMAṆIḤ WITH TELUGU MEANING.

Pages, 94. Lines, 5 on a page.

Begins on fol. 5*a* of the MS. described under No 13129.
Contains the second Vilāsa complete and the third incomplete.
Same work as the above.

No. **13364.** वैद्यचिन्तामणिः, आन्ध्रटीकासहितः.

VAIDYACINTĀMAṆIḤ WITH TELUGU MEANING.

Pages, 64. Lines, 28 on a page.

Begins on fol. 120*a* of the MS. described under No. 13117.

Contains the first Vilāsa only.

Same work as the above.

No. **13365.** वैद्यचिन्तामणिः, आन्ध्रटीकासहितः.

VAIDYACINTĀMAṆIḤ WITH TELUGU MEANING.

Substance, palm-leaf. Size, 13¼ × 1⅛ inches. Pages, 231. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, old.

Contains the first Vilāsa complete.

Same work as the above.

No. **13366.** वैद्यचिन्तामणिः, आन्ध्रटीकासहितः.

VAIDYACINTĀMAṆIḤ WITH TELUGU MEANING.

Pages, 38. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 13174.

Contains the first Vilāsa only.

Same work as the above.

Name of the scribe : Rāmayyan, son of Cāmarti Narvanna. Date of transcription : Saturday, the 15th day of the bright fortnight of the month of Phālguna in the year Plavaṅga.

No. **13367.** वैद्यचिन्तामणिः, आन्ध्रटीकासहितः.

VAIDYACINTĀMAṆIḤ WITH TELUGU MEANING.

Substance, palm-leaf. Size, 13⅛ × 1⅛ inches. Pages, 30. Lines, 7 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Contains the first Vilāsa incomplete.

Same work as the above.

No. **13368.** वैद्यचिन्तामणिः, आन्ध्रटीकासहितः.

VAIDYACINTĀMAṆIḤ WITH TELUGU MEANING.

Pages, 131. Lines, 7 on a page.

Begins on fol. 236*a* of the MS. described under No. 13204.

Contains the third Vilāsa complete and the fourth incomplete.

Same work as the above.

Name of the copyist : Mājēṭi Sarvēśaliṅga. Date of transcription : Friday, the 10th day of the dark fortnight of the Adhika (excess) Śrāvaṇa month in the year Akṣaya.

No. 13369. वैद्यचिन्तामणिः, आन्ध्रटीकासहितः.

VAIDYACINTĀMAṆIḤ WITH TELUGU MEANING.

Pages, 92. Lines, 24 on a page.

Begins on fol. 169*a* of the MS. described under No. 13110.

Incomplete.

Same work as the above.

No. 13370. वैद्यचिन्तामणिः, आन्ध्रटीकासहितः.

VAIDYACINTĀMAṆIḤ WITH TELUGU MEANING.

Pages, 80. Lines, 8 on a page.

Begins on fol. 1*a* of the MS. described under No. 13157.

Contains the first Vilāsa incomplete.

Same work as the above.

No. 13371. वैद्यचिन्तामणिः, आन्ध्रटीकासहितः.

VAIDYACINTAMAṆIḤ WITH TELUGU MEANING.

Substance, palm-leaf. Size, $14\frac{7}{8} \times 1\frac{1}{8}$ inches. Pages, 374. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

Incomplete. Pages 17 to 32 contain the same matter as is found in pages 1 to 16.

Same work as the above.

Name of the copyist : Mājēṭi Sarvēśaliṅga. Date of copying : Monday, the 10th day of the dark fortnight of the Bhādrapada month in the year Saumya.

No. 13372. वैद्यचिन्तामणिः, आन्ध्रटीकासहितः.

VAIDYACINTĀMAṆIḤ WITH TELUGU MEANING.

Substance, palm-leaf. Size, $10^1 \times 1\frac{1}{3}$ inches. Pages, 314. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other works herein are Mantraviṣaya 158*a* (Telugu), Auṣadhayōgagrantha (Telugu) 163*a*.

Incomplete.

Same work as the above.

No. 13373. वैद्यचिन्तामणिः, आन्ध्रटीकासहितः.

VAIDYACINTĀMAṆIḤ WITH TELUGU MEANING.

Pages, 34. Lines, 5 on a page.

Begins on fol. 36*a* of the MS. described under No. 13348.

Contains the fourth Vilāsa only.

Same work as the above.

No. 13374. वैद्यचिन्तामणिः, आन्ध्रटीकासहितः.

VAIDYACINTĀMAṆIḤ WITH TELUGU MEANING.

Pages, 28. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 13126.

Contains the second Adhyāya without beginning and breaks off in the third Adhyāya.

Similar to the work described under No. 13095. By Yallubhaṭṭa of Śrīvatsagōtra. The portion contained in this MS. deals with the treatment of diseases, etc.

Beginning:

लालजालयुता जिह्वा शिरोर्तिर्हृदि वेदनम् ।
आम्लगन्धा त्वनिद्रा च पित्ताजीर्णस्य लक्षणम् ॥

* * * *

वदहीनं निम्बगुत्तापटलात्रिकटूनि च ।
एकैकं कर्षमात्रेण समांशं शरपुङ्खितम् ॥
अष्टा निःसाररूपेण जलद्रोणे विपाचयेत् ।
अष्टभागावशेषं तु अवतार्यैकभूत् सुधीः(?) ॥
पित्ताजीर्णं निहन्त्याशु अन्धकारं यथा रविः ॥

* * * *

Colophon:

इति वैद्यविद्यापारङ्गतश्रीवत्सगोत्रतिलकएल्लुभट्टप्रणीतायां वैद्यचिन्तामणौ चिकित्सासारसंग्रहो नाम द्वितीयोऽध्यायः ॥

End:

पाठा दार्वी च रजनी मूर्वा वचा जातिपल्लवैः ।
मृदुपक्वमिदं तैलं नश्यन्ति पक्वपीनसे ॥
अग्निं पुनर्नवावर्बरमूलं व्योषफलत्रयहिङ्गुविलङ्गम् ।
काथमिदं सकलं हृदि शूलहरं प्लीहामहोदरगुल्मकुठारम् ॥

No. 13375. वैद्यविषयः, आन्ध्रटीकासहितः.

VAIDYAVIṢAYAḤ WITH TELUGU MEANING.

Pages, 382. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 13313.

Wants the beginning and the end.

Similar to the work described under No. 13284.

Beginning:

पिप्पल्यादिघृतम्—

पिप्पलिः द्रयवधावनितिक्ताशारिबामलकतामलकीभिः ।
बिल्वनिम्बहिममालतिनीपैर्द्राक्षयाति विषयास्थिरया च ॥
घृतमाशु त्रिसाधितं . . . . मकम् ।
. . भृशतापमंसयोर्वमथुं पार्श्वशिरोरुजं क्षयापहम् ॥

* * * *

पारदं शुल्बभस्मं च विषं मरिचनागरे ।
त्रिक्षारान् पञ्च लवणान सम्यगार्द्रगजद्रवैः ॥
काचकुप्यान्तरे क्षिप्त्वा मृदा संलेपयेत् बहिः ।

* * * *

प्रतापाग्निकुमारोऽयं सर्वरोगहरं परम् ॥

End:

पिप्पल्याश्च रजः प्रस्थं शर्करायास्तदर्धकम् ।
विलङ्गं नागरम्भा च जीरकं मरिचं पृथक् ॥
चतुष्पलं तदर्धं स्यात् पिप्पलीमूलमेव च ।
चव्यं च ति(द्वि)पलं चैव चित्रकस्यारजस्तथा ॥
अया . . . द्विपलं भृङ्गस्य च रजस्तथा ।
सर्वमेकत्र सञ्चूर्ण मधुप्रस्थं द्वयं क्षिपेत् ॥

एकादशात्मकं शोषं छर्दिगुल्ममरोचकम् ।
वमनं श्वासकासं च मन्दाग्निं च नियच्छति ॥

No. 13376. वैद्यविषयः, आन्ध्रटीकासहितः.
VAIDYAVIṢAYAḤ WITH TELUGU MEANING.

Pages, 31. Lines, 26 on a page

Begins on fol. 9*b* of the MS. described under No. 13334.

Deals with the following subjects :—

१. मूत्रपरीक्षा.
२. मलपरीक्षा.
३. जिह्वापरीक्षा.
४. शब्दपरीक्षा.
५. स्पर्शपरीक्षा.
६. देहस्वरूपपरीक्षा.
७. नेत्रपरीक्षा.
८. स्वेदपरीक्षा.
९. ज्वरोत्पत्तिनिदानचिकित्सादि-निरूपणम्.

On the different methods of diagnosing diseases and treatment of fever.

Beginning :

ततो मूत्रपरीक्षित्वं वक्ष्यते शास्त्रनिश्चयम् ।
रजन्या अन्त्ययामस्य घटिकानां चतुष्टयम् ॥
वृद्धादिरोगिणीवैद्यं मूत्रोत्सर्गे च कारयेत् ।
आदिधारां परित्यज्य मध्यधारां परिग्रहेत् ॥
अन्त्यधाराश्च निस्सारं तत्त्याज्यं भिषगुत्तमैः ।
शुद्धं कांस्यादिकं पात्रं मृन्मये वातपे दृढे ॥

* * * *

Colophon :

इति मूत्रपरीक्षा समाप्ता ॥

End :

ग्रन्थान्तरे—

आदावामविकारार्थे लङ्घनं प्रथमं नरः ।
द्वितीयं पित्तनाशाय तृतीये वातनाशनम् ॥

चतुर्थे श्लेष्मनाशाय पञ्चमं क्षुद्विनाशनम् ।
षष्ठं तु लघुगात्राणि सप्तमं ज्वरनाशनम् ॥
अष्टममग्निघातं च नवमं रसवर्जितम् ।
अभूमिजमनाकाशमनर्घे रसवर्जितम् ॥
सर्वदोषहरं पथ्यं लङ्घनं परमौषधम् ।

*　　*　　*　　*

नखयोः कररेखान्ते रक्तसम्पूर्णपूरितम् ।
जानात्येवंविधं साध्यं चिकित्सां कुरु पण्डित ॥

No. **13377.** वैद्यशास्त्रम्, आन्ध्रटीकासहितम्.

VAIDYAŚĀSTRAM WITH TELUGU MEANING.

Pages, 165. Lines, 7 on a page.

Begins on fol. 89*a* of the MS. described under No. 13204.

Incomplete.

Deals with the preparation of various medicines for curing different kinds of diseases.

Beginning:

एलालवङ्गतालीसग्रन्थिरोषणनागरैः ।
सरसाचव्यारो भार्ङ्गिकर्कटं च सुजीरकम् ॥
एभिस्समांशमाकृष्णां त्रिगुणं शर्करांशकैः ।
एतेषां चूर्णितं प्रातः काशश्वासक्षतक्षयम् ॥
हृद्रोगारुचिहल्लासश्वासश्यामोर्ध्वमारुतान् ।
विसर्पिकामिलाच्छर्दिप्रतिश्यायगलग्रहाः ॥
हिक्कार्शोग्रहिर्णीदोषा पित्तगुल्मविकारजित् ।
सन्तताभ्यासयोगेन रसायनपरा नृणाम् ॥

End:

उष्णोदकानुपानेन इच्छाभेदी रसस्स्मृतः ।
अयःपतिरसो नाम अश्विनीदेवनिर्मितम् ॥

मधूकतैलम्—

मधूकयष्टिकल्काभ्यां गुलूच्याः स्वरसेन वा ।
तैलं हन्ति शिरस्तोदं वातपित्तकफं हरेत् ॥

No. 13378. शतयोगग्रन्थः, आन्ध्रटीकासहितः.

ŚATAYŌGAGRANTHAḤ WITH TELUGU MEANING.

Pages, 112. Lines, 6 on a page.

Begins on fol. 53a of the MS. described under No. 13348.

Incomplete.

Deals with the preparation of medicines of various kinds for curing diseases.

Beginning:

चिकित्सतन्त्रस्य गृहीतभाम्ना चिकित्सका ह्रिप्रकृतिस्वदूरम्? ।
विदग्धवैद्याः प्रतिपूजितस्य करिष्यते योगशतस्य वि(वै)धम् ॥
परीक्ष्य हि त्वामयलक्षणानि चिकित्सितज्ञानचिकित्सकेन ।
निरामभेदान्वयभेषजानि भवन्ति युक्तान्यमृतोद्भवानि ॥
छिन्नोद्भवाहम्बुधधन्वयदाशानविश्वा दुस्पर्शपर्पटमेघकिराततिक्ते ।
काथं पिबेदनिलपित्तकफज्वरेषु ॥

End:

विषताम्रं बलिं चैव गौरीपाषाणकं समम् ।
नाभिसूतं द्वयं भागं निर्गुण्डीतुलसीरसम् ॥
रसेन मर्दितव्योऽत्र तिलमात्रप्रमाणकम् ।
हुताशनरसो नाम सान्निपातकुलान्तकः ॥

* * * *

द्वन्द्वजं वातकज्वरं हन्ति सत्यं न संशयः.

No. 13379. सिद्धमन्त्रः, प्रकाशव्याख्यासहितः.

SIDDHAMANTRAḤ WITH THE COMMENTARY PRAKĀŚA.

Substance, paper. Size, 12 × 9¾ inches. Pages, 36. Lines, 28 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Contains the following Vargas:—

१. वातघ्नवर्ग.	५. कफवातघ्नवर्ग.
२ पित्तघ्नवर्ग.	६. कफपित्तघ्नवर्ग.
३. कफघ्नवर्ग.	७. दोषघ्नवर्ग.
४. वातपित्तघ्नवर्ग.	८. हितवर्ग.

Complete.

A treatise of the nature of materia medica. Herein the substances are grouped according as they are considered efficacious in removing

वात, पित्त, कफ or a combination of any of these. The text is by **Kēśa**vapaṇḍita, son of Mahādēva. The commentator is his son, **Vōpadēva.**

Beginning:

मू ॥ आयुर्वेदसुधाम्भोधिसारसारणिका गिरः ।
उल्लासितौषधग्रामा जयन्त्यमृतजन्मनः ॥

व्या ॥ आरोग्यवैद्यनाथाख्यं नमः सत्त्वादि सद्मनाम्(?) ।
मातापितृभ्यां दातृभ्यामायुःसुखसितामिदम्(?) ॥
येनोच्चारितमात्रेण पुरः स्फुरति भेषजम् ।
सोऽयं भिषग्वरप्रीत्यै सिद्धमन्त्रः प्रकाश्यते ॥

ग्रन्थारम्भे ग्रन्थकृदभीष्टदेवतमभिष्टौति, जयन्ति सर्वोत्कर्षेण वर्तन्ते । काः, गिरः वाचः । कस्य, अमृतजन्मनः अमृतं पीयूषं जन्म उत्पत्तिस्थानं यस्य अमृतस्य जन्मेति वा ।

* * * *

आयुर्वेदोपदेशप्रशमितसमस्तातङ्को धन्वन्तरिरेव सर्वोत्कृष्टा देवता इति स्तुतिवाक्यार्थः ।

अथ प्रयोजनमभिधेयमभिधत्ते—

मू ॥ ग्रन्थः संग्रथ्यतेऽत्यल्पः सिद्धमन्त्राह्वयो मया ।
वैद्याः सुखेन द्राग्द्रव्यशक्तितत्त्वं विदन्त्विति ॥

व्या ॥संग्रथ्यते सम्यक् विरच्यते । केन, मया । क , प्रबन्धः । कथंभूतः, अत्यल्पः प्रतिसंक्षिप्तः । किन्नामा, सिद्धमन्त्राह्वयः सिद्धमन्त्र इत्याह्वयोऽभिधा अस्येति तथा । सा चाभिधा सिद्धमन्त्रवदल्पायाससाध्यत्वात् बहुफलप्रदत्वाच्चान्वर्था

* * * *

मू ॥ रसवीर्यविपाकैर्हि द्रव्यशक्तिर्विविच्यते ।
कोपे शमे वा दोषाणां सात्र स्पष्टा न तेनते ॥

व्या ॥ ननु प्राचीनेषु ग्रन्थेषु रसवीर्यविपाकपूर्वको द्रव्यशक्तिविवेकः कृतः । इह तु कथं न तथेत्याह । हि यस्मात् रसादिभिः द्रव्यशक्तिर्विविच्यते, नतु रसादिविवेक एव फलम् । क विषये द्रव्यशक्तिः दोषाणां कोपे शमे वा दोषाः वातपित्तकफाः कोपः संक्षोभः शमः साम्यम् सा द्विविधा शक्तिः अस्मिन् ग्रन्थे स्पष्टा शब्दोपात्ता ।

* * * *

मू ॥ वाते पित्ते कफे वातपित्ते वातकफे क्रमात् ।
कफपित्ते त्रिषु हिताः वर्गाः सप्त हितोऽष्टमः ॥

व्या ॥ अथ प्रकरणशुद्ध्यर्थं वर्गानुद्दिशति—त्रिषु वातपित्तकफेषु हिताः वातादिषु प्रकुपितेषु सत्सु सेव्यमानं यत् स्वास्थ्यं करोति तद्धितं द्रव्यम् । तत्प्रकाशनाद्वर्गा अभि(पि)हिताः । एवमष्ट हिताः । इत्यष्टवर्गोऽयं सिद्धमन्त्रः ॥

Colophon:

इति वोपदेवीये सिद्धमन्त्रप्रकाशे नवश्लोकी ।

* * * *

Colophon:

इति वोपदेवीये सिद्धमन्त्रप्रकाशे वातघ्नवर्गः ॥

End:

मू ॥ लेभे जन्म महादेवादायुर्वेदं च भास्करात् ।
सम्मानं सिंहराजाद्यः केशवः कारकोऽस्य सः ॥

व्या ॥ अथ ग्रन्थकृच्छ्रोतृणामादरार्थमात्मानं ख्यापयति—

अस्य सिद्धमन्त्रस्य केशवनामा भिषक् कारकः कर्ता । यो महादेवा जन्म लेभे लब्धवान्, महादेवशब्दत्वाच्च महादेवो देवपदाभिधानमहाग्रहारनिवासी विप्रः । अथवानेकजन्माराधनसन्तुष्टान्महादेवा . . . . . परोपकारक्षमं जन्म लेभे । यश्च भास्करादायुर्वेदं लेभे ।

* * * *

धनेशाध्यापिता देवपक्षके पितृकर्तृकम् ।
सिद्धमन्त्रं विवृतवान् वोपदेवः सतां मुद ॥

Colophon:

इति श्रीवोपदेवपण्डितविरचिते सिद्धमन्त्रप्रकाशे भिषक्केशवपण्डितविरचित-सिद्धमन्त्रप्रबोधः समाप्तिमगात् ॥

No. **13380** सिन्दूरविषयः आन्ध्रटीकासहितः.

SINDŪRAVIṢAYAḤ WITH TELUGU MEANING.

Pages, 19. Lines, 27 on a page.

Begins on fol. 70*a* of the MS. described under No. 13310, wherein this work has been omitted to be given as other work.

Incomplete.

On the preparation of certain medicinal powders.

Beginning:

श्रीनीलकण्ठवंशाब्धिचन्द्रमा बसवाह्वयः ।
वक्ष्यामि वृषराजीयं महावैद्यशिखामणिम् ॥

*　　*　　*　　*

विजयसिन्दूरम्—

शुद्धसूतं शुद्धगन्धं प्रत्येकं च चतुःपलम् ।
त्रिदिनं मर्दयेत् खल्वे यावत् कदिरसन्निभम् ॥
द्विपलं नवसारं च वत्सनाभं समांशकम् ।
शुण्ठीमरिचपिप्पल्यावथ कर्षं नियोजयेत् ।

*　　*　　*　　*

वरपुष्यतमं पुंसां स्त्रीसेवां लभते मुदा ॥
अध्वातिथि(वि)निर्दिष्टं नाम्ना विजयसिन्दुरम् ॥
नृणां हि कौतुकार्थाय भिषग्जीवनहेतवे ।

End:

सूर्याग्निलेपितश्चैव मन्दमध्यखराग्निना ॥
दिनत्रयेण सरसं भावे सिन्दूरसन्निभम् ।
नानानुपानयोगेन सर्वरोगं निहन्ति च ॥

No. **13381.** सूपशास्त्रम्, कर्णाटकटीकासहितम्.

SŪPAŚĀSTRAM WITH KANARESE MEANING.

Substance, palm-leaf. Size, $14\frac{1}{8} \times 1\frac{3}{8}$ inches. Pages, 108. Lines, 6 on a page. Character, Kanarese. Condition, good. Appearance, old. Incomplete.

A treatise bearing on cookery. The work is attributed to Bhīmasēna. Foll. 12 to the end are written in Kanarese language.

Beginning:

निवसत्सु पाण्डुसूनुर्विराटनगरे पुरा पवनपुत्रः ।
चक्रे पितुः प्रसादात्तन्त्रमिदं सूप . . . . . ॥

*　　*　　*　　*

प्रथमं द्रुतिति फलानां घृततक्रपयो पितृप्रसादतः (?) ।
दधिविकारं च नवनीतकरणमेषा तटिविश्रुतसारपूपकारणं च ।
. . . . ॥

*　　*　　*　　*

शिग्रुमूलस्य चूर्णेन मर्दितं पानसं फलम् ।
द्रुतं स्याद्रागलं पक्षपलमौदुम्बरत्वचा ॥

* * * *

पक्कं कपित्थं लवणं लशमूषातपे स्थितम् ।
शालमूलस्य चूर्णेन पक्कं फलं च द्रुतं स्यात् ॥

* * * *

End:

इत्थं समीरणसुतः सकलौषधीनां सारं विचार्य रसवीर्यविपाकयोगम् ।
राजानमन्वहमतोषयदश्वपूर्वं . . . . र्द दाम चकार च सूपतन्त्रम् ॥

GENERAL INDEX.

[NOTE.—The names printed in *italics* are those of the works described.]



